# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – रामानुजवेदान्तः | **कोड – CC-2.3.5** | समयः – ०३ तः ०६ |
| दिनाङ्कः – २९/११/२०१६ | सन्दर्भग्रन्थः – भगवद्गीता (१-३ अध्यायाः) रामानुजभाष्यसहिता | |

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ निम्नलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदः॥

(२) वेपथुश्च शरीरे मे रोमहर्षश्च जायते।
गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते॥

(३) कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) भगवद्रामानुजकृतगीताभाष्यमङ्गलं विलिख्य भगवदवतारद्वारा गीताशास्त्रस्य प्रवृत्तिं प्रदर्शयत

(२) श्रीकृष्णं प्रति विषण्णार्जुनस्य विषादोक्तिं युद्धाकरणनिश्चयं च लिखत

**प्रश्नः – ३ निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्** ०२

(१) “श्रियः पतिः” इति पदस्य कोऽर्थः ? (२) “वर्णसङ्करः” इति पदस्य कोऽर्थः ?

**प्रश्नः – ४ अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत।** ०२

(१) पार्थः कः ? (३) धनञ्जयस्य शङ्खस्य नाम किम् आसीत् ?

(२) प्रथमाध्यायस्य नाम किम् ? (४) कः अच्युतः ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ निम्नलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥

(२) सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि॥

(३) या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरं लिखत।** ०८

(१) गीतोक्तरीत्या आत्मनः दुर्बोधत्वं तद्द्रष्टृश्रोतृवक्तॄणां च दौर्लभ्यत्वं यथाभाष्यं प्रतिपादय

(२) स्थितप्रज्ञस्य यथाभाष्यं लक्षणपुरस्सरं वर्णनं लिखत

**प्रश्नः – ७ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) “योगः कर्मसु कौशलम्”। (३) “व्यवसायात्मिका बुद्धिः”।

(२) “ब्राह्मी स्थितिः” (४) “समत्वं योग उच्यते”।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) सङ्गात् किं सञ्जायते?

(२) कः कौन्तेयः?

(३) कस्य भावः न विद्यते ?

(४) कस्य मृत्युः ध्रुवम्?

(५) क्रोद्धात् किं भवति?

(६) मद्भगवद्गीतायां कति अध्यायाः सन्ति?

(७) विशिष्टाद्वैतसिद्धान्ते गीताभाष्यकारः क?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मनाऽनघ!
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥

(२) देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥

(३) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) कर्मणो जगच्चक्रप्रवृत्तिहेतुत्वं यथाशास्त्रं प्रतिपादयत

(२) भगवद्गीतानुसारेण स्वधर्मस्य वर्णनं कुरुत

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) मिथ्याचारः।

(२) मुक्तसङ्गः समाचर।

(३) "कर्मणैव हि संसिद्धिः"।

(४) "युद्ध्यस्व विगतज्वर"।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) पुरा प्रजापतिः किम् उवाच?

(२) पर्जन्यः कस्माद् भवति?

(३) कस्य कार्यं न विद्यते ?

(४) कः कर्ताहमिति मन्यते ?

(५) कः धर्मः श्रेयान्?

(६) ज्ञानं केन आवृतम् भवति?

(७) तृतीयाध्यायस्य नाम किम्?

***

**Answer Key**

कक्षा – शास्त्रिद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – CC-2.3.5** समयः – ०३ तः ०६

दिनाङ्कः – २९/११/२०१६ सन्दर्भग्रन्थः – भगवद्गीता (१-३ अध्यायाः) रामानुजभाष्यसहिता

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – ४**
१. अर्जुनः
२. अर्जुनविषादयोगः
३. देवदत्तः
४. श्रीकृष्णः

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ७**
१. कर्मसु क्रियमाणेष्वयं बुद्धिःयोगः कौशलम् अतिसामर्थ्यम्। अतिसामर्थ्यसाध्य इत्यर्थः।
२. व्यवसायात्मिका बुद्धिः = आत्मयाथात्म्यनिश्चयज्ञानपूर्वकमोक्षसाधनभूतकर्मविषया बुद्धिः।
३. स्थितधीलक्षणा ब्राह्मी ब्रह्मप्रापिका असङ्गकर्मणि स्थितिः।
४. योगः सिद्ध्यसिद्धयोः समत्वरूपं नामचित्तसमाधानम् भवति।

**प्रश्नः – ८**
१. कामः
२. अर्जुनः
३. असतः
४. जातस्य
५. सम्मोहः
६. अष्टादश
७. श्रीमद्रामानुजाचार्यः

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ११**
१. अन्यथा सङ्कल्प्य अन्यथा चरतीति स मिथ्याचारः
२. यज्ञप्रयोजनतया यः सङ्गः, तस्मात्सङ्गात् मुक्तः सन् समाचर।
३. ज्ञानयोगाधिकारिणोऽपि कर्मयोग एवात्मदर्शने श्रेयान्, अत एव हि जनकादयो राजर्षयो ज्ञानिनामग्रेसराः कर्मयोगेनैव संसिद्धिमास्थिताः।
४. मयि सर्वेश्वरे सर्वाणि कर्माणि सन्न्यस्य निराशीर्निर्ममश्च भूत्वा युद्धादिकं सर्वं चोदितं कर्म कुरुष्व

**प्रश्नः – १२**
१. अनेन यज्ञेन प्रसविष्यध्वम्, आत्मनो वृद्धिं कुरुध्वम् इति
२. यज्ञात्
३. आत्मन्येव सन्तुष्टस्य
४. अहङ्कारविमूढात्मा
५. स्वधर्मः
६. अज्ञानेन
७. कर्मयोगः।